# Lingashtakam

Sanskrit · Devanagari source script · Latin rendering available

ब्रह्ममुरारी सुरार्चित लिङ्गं ।
निर्मल भासित शोभित लिङ्गं ॥
जन्मज दुःख विनाशक लिङ्गं ।
तत् प्रणमामि सदाशिव लिङ्गं ॥ १ ॥

brahmamurārī surārcita liṅgaṃ |
nirmala bhāsita śobhita liṅgaṃ ||
janmaja duḥkha vināśaka liṅgaṃ |
tat praṇamāmi sadāśiva liṅgaṃ || 1 ||

देवमुनि प्रवारार्चित लिङ्गं ।
कामदहन करुणाकर लिङ्गं ॥
रावण दर्प विनाशक लिङ्गं ।
तत् प्रणमामि सदाशिव लिङ्गं ॥ २ ॥

devamuni pravārārcita liṅgaṃ |
kāmadahana karuṇākara liṅgaṃ ||
rāvaṇa darpa vināśaka liṅgaṃ |
tat praṇamāmi sadāśiva liṅgaṃ || 2 ||

सर्व सुगन्ध सुलेपित लिङ्गं ।
बुद्धी विवर्धन कारण लिङ्गं ॥
सिद्ध सुरासुर वंदित लिङ्गं ।
तत् प्रणमामि सदाशिव लिङ्गं ॥ ३ ॥

sarva sugandha sulepita liṅgaṃ |
buddhī vivardhana kāraṇa liṅgaṃ ||
siddha surāsura vaṃdita liṅgaṃ |
tat praṇamāmi sadāśiva liṅgaṃ || 3 ||

कनक महामणि भूषित लिङ्गं ।
फणिपति वेष्टित शोभित लिङ्गं ॥
दक्ष सुयज्ञ विनाशन लिङ्गं ।
तत् प्रणमामि सदाशिव लिङ्गं ॥ ४ ॥

kanaka mahāmaṇi bhūṣita liṅgaṃ |
phaṇipati veṣṭita śobhita liṅgaṃ ||
dakṣa suyajña vināśana liṅgaṃ |
tat praṇamāmi sadāśiva liṅgaṃ || 4 ||

कुमकुम चंदन लेपित लिङ्गं ।
पंकज हार सुशोभित लिङ्गं ॥
संचित पाप विनाशक लिङ्गं ।
तत् प्रणमामि सदाशिव लिङ्गं ॥ ५ ॥

kumakuma caṃdana lepita liṅgaṃ |
paṃkaja hāra suśobhita liṅgaṃ ||
saṃcita pāpa vināśaka liṅgaṃ |
tat praṇamāmi sadāśiva liṅgaṃ || 5 ||

देवागणार्चित सेवित लिङ्गं ।
भावै-र्भक्तिभिरेव च लिङ्गं ॥
दिनकर कोटी प्रभाकर लिङ्गं ।
तत् प्रणमामि सदाशिव लिङ्गं ॥ ६ ॥

devāgaṇārcita sevita liṅgaṃ |
bhāvai-rbhaktibhireva ca liṅgaṃ ||
dinakara koṭī prabhākara liṅgaṃ |
tat praṇamāmi sadāśiva liṅgaṃ || 6 ||

अष्टोदलोपरीवेष्टित लिङ्गं ।
सर्वसमुद्भव कारण लिङ्गं ॥
अष्टदरिद्र विनाशन लिङ्गं ।
तत् प्रणमामि सदाशिव लिङ्गं ॥ ७ ॥

aṣṭodaloparīveṣṭita liṅgaṃ |
sarvasamudbhava kāraṇa liṅgaṃ ||
aṣṭadaridra vināśana liṅgaṃ |
tat praṇamāmi sadāśiva liṅgaṃ || 7 ||

सुरगुरु सुरवर पूजित लिङ्गं ।
सुरवन पुष्प सदार्चित लिङ्गं ॥
परात्पर परामात्मक लिङ्गं ।
तत् प्रणमामि सदाशिव लिङ्गं ॥ ८ ॥

suraguru suravara pūjita liṅgaṃ |
suravana puṣpa sadārcita liṅgaṃ ||
parātpara parāmātmaka liṅgaṃ |
tat praṇamāmi sadāśiva liṅgaṃ || 8 ||

लिङ्गाष्टकमिदं पुण्यं यः पठेश्शिव संनिधौ ।
शिवलोकमवाप्नोती शिवेन सह मोदिते ॥

liṅgāṣṭakamidaṃ puṇyaṃ yaḥ paṭheśśiva saṃnidhau |
śivalokamavāpnotī śivena saha modite ||

---

## Source & edition

Complete selected Sanskrit Wikisource poem block; source opening/closing lines and spellings are preserved. Segment grouping is added for reading. No English meaning is supplied for this edition.

Sanskrit Wikisource contributors (transcription); classical composition attribution recorded separately. लिङ्गाष्टकम्, revision 229442. CC BY-SA 4.0.

The source spellings are retained. Reading blocks and the Latin rendering help you follow the text; these adaptations are also CC BY-SA4.0.

Edition ws-229442-7f49610048.